वर्षम् - ०१ अङ्कः - ०१ शोधज्योतिः
जनवरी-दिसम्बर, २०१९ ISSN-2350-0700

# अवस्थात्रये वृत्तिविचारः

**डॉ. जानकीशरण आचार्यः***

**सत्यं ज्ञानानन्दं यद्ब्रह्म बोधितं गुरोर्गिरा।**
**अवस्थात्रयविवेकेन तत्तत्त्वमत्र विविच्यते॥**

जीवस्य तावत् जाग्रत्, स्वप्नः, सुषुप्तिश्च इति अवस्थात्रयं विद्यते। तदुक्तं वेदान्तपरिभाषायां—"**स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान्**[1]" इति। एतच्चावस्थात्रयं न जीवस्य स्वरूपलक्षणम्, अपि तु तटस्थलक्षणमिति बोद्धव्यम्। तस्य स्वरूपलक्षणन्तु चिद्रूपादिकम्। तत्र जाग्रद्दशा नाम "**इन्द्रियजन्यज्ञानावस्था**[2]"। **इन्द्रियजन्यज्ञानोपलक्षितकालो जाग्रदित्यर्थः**[3]। तेन जाग्रदवस्थायां सुखाद्यनुभवकाले औदासीन्यकाले च इन्द्रियजन्यज्ञानाभावेऽपि तद्योग्यत्वमस्तीति नाव्याप्तिः। सुषुप्तौ तु इन्द्रियव्यापाराभावात् न तत्राव्याप्तिः। स्वप्ने हि अविद्यावृत्तिः एव वर्तते, न तु इन्द्रियवृत्तिः। "**इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्था स्वप्नावस्था**[4]"। सुखादिविषयकापरोक्षन्तःकरण-वृत्तिः जाग्रद्दशायामपि विद्यते इत्यत्रातिव्याप्तिवारणार्थमिन्द्रियाजन्या इति विशेषणदलम्। जाग्रद्दशायामपि यद्यपि अधिष्ठानगोचरापरोक्षान्तःकरणवृत्तिः वर्त्तते तथापि न तदा इन्द्रियव्यापारोपरमः इति न तत्रातिव्याप्तिः। अत्र अन्तःकरणपदमविद्यावृत्तिरूपत्वात् अन्तःकरणवृत्तिरूपत्वाभावाच्च न तत्रातिव्याप्तिः इति। जाग्रत्स्वप्नभोगप्रदकर्मक्षये सति सवासनस्यान्तःकरणस्य संस्काररूपेणावस्थानं सुषुप्त्यवस्था। तथा चोक्तं वेदान्तपरिभाषायां "**सुषुप्तिर्नाम अविद्यागोचराऽविद्यावृत्त्यवस्था**"[5]। अविद्याविषयिणी संसर्गविषयिणी आविद्यकवृत्तिः एव सुषुप्तिः

---

* दर्शनसङ्कायाध्यक्षचरः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गीर-सोमनाथः, वेरावलम् (गुजरातम्)

[1] वेदान्तपरिभाषा, पृ. ३४२

[2] तत्रैव, पृ. ३४३

[3] तत्रैव शिखामणौ, पृ. ३४३

[4] वेदान्तपरिभाषा, पृ. ३५०

[5] वेदान्तपरिभाषा, पृ. ३५०

इत्यर्थः। अविद्यावृत्त्यवस्था सुषुप्तिः इत्युक्ते सति स्वप्नजागरयोः अतिव्याप्तिः भवति, जाग्रदवस्थायां शुक्तिरजतादिगोचरायाः स्वप्ने च स्वाप्निकगजादिगोचरायाः अविद्यावृत्तेः अभ्युपगमात्। एवञ्च जाग्रत्स्वप्नयोरविद्याकारवृत्तेः अन्तःकरणवृत्तित्वान्न तत्रातिव्याप्तिः।

## अवस्थात्रयविवेकः

उपनिषत्सु अवस्थात्रयस्य निरूपणस्यावसरे अवस्थात्रयविनिर्मुक्तः आत्मा इति आत्मनः स्वरूपं प्रतिपादयितुम् अवस्थात्रयनिरूपणं कृतमस्ति। अपि च अस्यावस्थात्रयनिरूपणस्य किञ्चिदन्यदपि प्रयोजनमस्ति। स्वप्नावस्थायाः निरूपणस्य द्वे प्रयोजने उपलक्षयितुं शक्येते। "**अत्रायं पुरुषः स्वयं ज्योतिः**[६]" इति श्रुतिवाक्येन स्वप्नावस्था आत्मनः स्वप्रकाशत्वनिरूपणाय उपयुक्ता अस्ति। अस्यां श्रुतौ "अत्र" इति पदेन स्वप्नावस्था परामृश्यते। यतः बाह्यज्योतिर्व्यतिकरे सति आत्मनः अयं प्रकाशः उत् अन्यज्योतेः इति पृथक्कर्तुं न शक्यते अतस्तत्र श्रुतौ स्वप्नावस्था उक्ता, न सुषुप्त्यवस्था। यतो हि जाग्रदवस्थायाम् एतत् स्पष्टरूपेण बोधयितुं न शक्यते। तत्र आदित्यादिज्योतिषां चक्षुरादिजन्यवृत्तिज्ञानानां च विषयावभासकत्वेन प्रसिद्धिः वर्तते। सुषुप्त्यवस्थायामपि आत्मनः स्वरूपं "**स्वयमेव विविक्तज्योतिर्भवति, बाह्याध्यात्मिकभूतभौतिकसंसर्गरहितो भवति**[७]"। तथापि तत्र "स्वयं ज्योतिः" इति निरूपयितुं न शक्यते, सुषुप्तौ कस्यापि अन्यस्य प्रकाश्यस्य अभावात्। अतः यत्र प्रकाश्यं किञ्चिद्भवेत्, प्रकाशश्च आत्मव्यतिरिक्तोऽन्यः कोऽपि न भवेत्, तस्यामेवावस्थायां आत्मन एव स्वप्रकाशत्वमिति स्थापयितुं शक्यते। सा अवस्था स्वप्नावस्था भवेदिति श्रुत्या स्वप्नावस्था उक्ता। तत्र स्वप्नावस्थायां ये ये पदार्थाः भासन्ते, तेषामपि उत्पत्तिः "**अथ रथान् रथयोगान् पथः सृजते**[८]" इति श्रुत्यैव कथिता।

श्रुतौ एतद्यत्सृष्टिकथनमस्ति तदनिवर्चनीयख्यातिवादस्य मूलमिति वक्तुं शक्यते। यथा इदं रजतमिति भ्रमस्थले तात्कालिकमनिवर्चनीयं रजतमुत्पद्यते इति अनिर्वचनीयख्यातिवादिनोऽद्वैतिनो मन्यन्ते। शुक्तिरजतस्थले कश्चन पदार्थः उत्पद्यते विनश्यति च इति तु अस्माकमनुभवगोचरः न भवति, तथापि एतानि एव श्रुतिवाक्यानि अवलम्ब्य स्वप्ने यथा पदार्थोत्पत्तिर्भवति तद्वदेव अन्येष्वपि भ्रमेषु अनिर्वचनीयपदार्थोत्पत्तिः भवति इति प्रामाण्यत्वेन अनिर्वचनीयख्यातिवादिभिः स्वीकृताऽस्ति। एवञ्च स्वप्नावस्थायाः यन्निरूपणमस्ति तदनिर्वचनीयख्यातिवादस्य साधनार्थमुपयुज्यत इति स्वप्नावस्थायाः प्रयोजनमिति वक्तुं शक्यते, अपि च आत्मनः स्वयंज्योतिस्स्वरूपस्थापनार्थमपि। किञ्च स्वप्नावस्थायां

---

[६] बृहदारण्यकोपनिषत्, ४-३-९

[७] बृहदारण्यकोपनिषत् - शाङ्करभाष्यम्, ४-३-९

[८] बृहदारण्यकोपनिषत्, ४-३-१०

येषां पदार्थानां सृष्टिः श्रुतिभिरुच्यते तेषां व्यावहारिकी सृष्टिः नैव वक्तुं शक्यते। यदि स्वप्नावस्थायां ते पदार्थाः उत्पद्येरन् तदानीं स्वप्नावस्थायां दृश्यमानः सूर्यादिरूपप्रकाशोऽपि उत्पन्नः एव इति कृत्वा जाग्रदवस्थायां यथा आत्मनः ज्योतिरन्तरेण साङ्कर्यं, तद्वदेव स्वप्नावस्थायामपि सम्पन्नम् इति कृत्वा पुनः स्वप्नावस्थायाम् आत्मन एव प्रकाश इत्येतन्निर्णेतुं दुश्शकं स्यात्। तस्मात् तत्र या सृष्टिः सा वस्तुगत्या "**मायामात्रं तु कार्त्स्न्येन....**[९]" इतिरीत्या प्रातिभासिकी सृष्टि एवास्ति। प्रातिभासिकः पदार्थः कस्यचिद् व्यावहारिकस्य अर्थस्य क्षमो न भवति। अतः तत्र विद्यमानः प्रकाशोऽपि आत्मन एव प्रकाश्यते, न तु प्रातिभासिकः प्रकाशः अन्यान् विषयान् प्रकाशयितुं क्षमो भवति। एवञ्च तत्र प्रकाशः वस्तुगत्या नास्ति। अतः प्रातिभासिकानां सर्वेषामपि पदार्थानां प्रकाशकः अन्यः कोऽपि नास्ति इति कृत्वा आत्मनः एव तत्र ज्योतिर्भवति इति निर्णीतं भवतीति स्वप्नावस्थायाः विशेषो वर्तते।

एतावता जाग्रत्स्वप्नयोः विवरणमुक्तम्। अधुना स्वप्नस्य सुषुप्तेश्च कोऽपि भेदो वक्तव्यो वर्तते। स्वप्नावस्थायां मनः कार्यं करोति, सुषुप्त्यवस्थायां तु न करोतीति भेदो वक्तुं न शक्यते यतो हि स्वप्नावस्थायामपि मनः स्वरूपेण कार्यं कुर्यात् तदानीं मनोरूपज्योतिर्व्यतिकरः आत्मनः प्राप्यते। अत एव भाष्यकारैरनेकत्र स्वप्नावस्थायां मनः दृश्यकोटौ प्रविष्टमस्ति न तु द्रष्टृकोटौ इत्युक्तम्। तत्र मनः साधनमपि भवितुं नार्हति। अत आत्मा एव तत्र प्रकाशरूपेण वर्तते इति निरूपितमस्ति। स्वप्नेऽपि मनः कार्यं न करोति, किन्तु वासनावत् तिष्ठति। सुषुप्त्यवस्थायां मनः लीनं भवति इति चेदुच्यते तर्हि मनसः कार्योपरमः एव लयः इति वक्तव्यम्। तदानीं स्वप्ने तथा सुषुप्त्यवस्थायामपि तथैव वक्तव्यम्। परन्तु अयमेकोऽस्ति विशेषः यत् स्वप्ने अहमध्यासो वर्तते, सुषुप्ते तु अध्यासो नास्ति। यथा छान्दोग्योपनिषदि इन्द्रप्रजापतिविद्यायाम् इन्द्रः कथयति - "**नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति**[१०]" इति। अहमिति यः अध्यासः, सः स्वप्ने अस्ति, सुषुप्तौ नास्ति। अयमेव स्वप्नसुषुप्तयोर्भेदः।

अधुना सुषुप्तिकालेऽपि मनः अस्ति न वा इति विचारः आवश्यकः। मनः सुषुतावपि नास्ति, प्रलयेऽपि नास्ति इति चेत् सुषुप्तिप्रलययोः भेदो न भवेत्। अविद्या तु उभयत्र वर्तते। अत एव प्रलयकाले अविद्यायाः सत्त्वात् पुनः सर्गो भवति। कार्योपरमरूपः मनसः अप्रतीतिरूपविशेष एव प्रलये लयः इत्युच्यते। एवञ्च सुषुप्त्यावस्थायाः प्रलयावस्थायाश्चायं भेदो वर्तते यत् सुषुप्तौ मनः अस्ति अत एव प्रबोधे झटिति आगच्छति। किन्तु प्रलयकाले मनः सवासनरूपेण नास्ति, वासनास्तु प्रलयकाले अविद्यायां तिष्ठन्ति। अत्र च किं विनिगमकमिति चेतुच्यते सुषुप्तेः उत्थितः पुरुषः एवं स्मरति - "एतावत् पर्यन्तमहं न किमपि अज्ञासिषम्"। प्रलयोत्तरं पुनः सर्गकाले तु प्रमाणाभावात् तादृशः अनुभवो नास्ति। तत्र सुषुप्तिकाले तिस्रो वृत्तयः स्वीक्रियन्ते। यद्यपि साक्षी स्वरूपतः अज्ञानादिभासको भवितुमर्हति

---

[९] ब्रह्मसूत्रम्, ३-२-३

[१०] छान्दोग्योपनिषत्, ८-११-१

तथापि तस्य साक्षिणः नित्यत्वात् स अनुभवः सर्वदा वर्तते। अपि च तेन विषयीकृतः अज्ञानादिरूपपदार्थोऽपि सर्वदा वर्तत इति कृत्वा जाग्रदवस्थायां स्मरणस्य अवकाशो न स्यात्। अतः कथं साक्षिरूपानुभवो गच्छेत् येन साक्षिणानुभूतस्य विषयस्य स्मरणं भवेत्, एतदर्थं शास्त्रकारैः सुषुप्त्यवस्थायां वृत्तयः स्वीकृताः सन्ति। सुषुप्तिकाले मनः कार्यं न करोति इति कृत्वा मनोवृत्तयः वक्तुं न शक्यन्ते। अतस्तत्र अविद्यावृत्तयः स्वीकृताः सन्ति। तत्र तिस्र वृत्तयः सन्ति - (१) सुखाकारा अविद्यावृत्तिः। (२) सुषुप्त्याकारा अविद्यावृत्तिः। (३) अज्ञानाकारा वृत्तिश्चेति। तादृशः ताः वृत्तयः सुषुप्तिकाले एव सन्ति ततः परं नश्यन्ति। एवञ्च तादृशवृत्तिविशिष्टसाक्षिरूपं तदानीं नश्यति इति कृत्वा वृत्तिनाशजन्यसंस्कारात् सुषुप्तौ अनुभूतविषयस्य जाग्रदवस्थायां स्मरणं सम्भवति। वार्तिककारैरपि सुषुप्ते अनुभूतस्य स्मरणं नैव सम्भवति इति उक्तम्। तत्र विषयः, अनुभविता, अनुभवश्च वर्तन्ते तर्हि कथं स्मरणस्य नावकाशः।

सुषुप्त्यवस्थायाः प्रयोजनमेतदपि वर्तते यत् लोके निर्विषयकसुखानुभवस्य पुरुषार्थत्वम् अनुभवगम्यं नास्ति। यतः जाग्रदवस्थायां स्वप्नावस्थायां च सर्वोऽपि बाह्यविषयमेव वाञ्छति। परन्तु मोक्षे तु निर्विषयकं सुखमुच्यते। तत्र विषयसम्बन्ध एव नास्ति। अतस्तत्र "अहमेव आनन्दो भवामि, न तु आनदस्य अनुभविता भवामि" इति उच्यते। तर्हि "अहम् आनन्दो भवितुं नेच्छामि, किन्तु आनन्दमनुभवितुमिच्छामि" इति यो वाञ्छति सः मोक्षं नैव इच्छेत्। अतः निर्विषयसुखमपि पुरुषार्थो भवतीति प्रदर्शयितुं श्रुत्या सुषुप्त्यवस्था उक्ता वर्तते। सुषुप्त्यवस्थायां जीवः आनन्देन तिष्ठति। यथा अकस्मादेव वयं सुषुप्तम् पुरुषम् उत्थापयामश्चेत् उत्थितो जनः कञ्चनानन्दम् अनुभवन्नेव किञ्चित् वक्तुं शक्नोति। यदि दुःखानुभवो नास्ति इति एतावन्मात्रेण सुषुप्तः चरितार्थो भवति इति वक्तुं न शक्यते। एतस्मिन् काले दुःखानुभवः स्वरूपतो भवन्नपि नैव ज्ञातुं शक्यते। अतः तत्र आत्मस्वरूपेण सुखं वर्तते, तादृशं सुखं स्वप्रकाशं वर्तते। स्वप्रकाशसुखानुभव एव तत्र पुरुषार्थ इति ज्ञायते। स्वप्रकाशसुखानुभवो नाम सुखापेक्षया अतिरिक्तः अनुभवो नास्ति इत्यर्थः अनुभवः अन्यो वर्तते चेत् तत् स्वप्रकाशो न भवति। एवञ्च स्वप्रकाशसुखानुभवः पुरुषार्थो भवति इत्येतत् बोधयितुमपि सुषुप्त्यवस्थायाः उपयोगो वर्तते।

किञ्च एकमन्यदपि प्रयोजनं तत्रास्ति - प्रायेण सर्वेऽपि दार्शनिकाः अहमुल्लेखभाक् आत्मानं स्वीकुर्वन्ति। यः अहमहमिति उल्लिख्यमानः पदार्थो भवति सः देहादिभ्यो व्यतिरिक्तः इन्द्रियेभ्यश्च व्यतिरिक्तः इति तु तेऽपि वदन्ति परन्तु अहमिति उल्लेखभाक् स एवात्मा, तत्रैव पर्यवस्यन्ति अन्ये दार्शनिकाः। परन्तु वेदान्ते एव अयं विशेषो वर्तते यत् अहमित्यत्र अपि विवेकं कृत्वा कश्चन अंशः तत्र अध्यस्तो वर्तते। यथा अहं देहेन्द्रियादिभ्यो व्यतिरिक्तोऽस्मि। एतद्वयमन्येषु देहादिषु व्यतिरेकेण द्रष्टुं प्रभवामः, एतद्देहस्याभावेऽपि देहान्तरेण स्वप्ने व्यवहरामः इति सिद्धत्वात्। स्वप्ने एतद्देहो नास्ति तथापि व्यवहारोऽस्ति। जाग्रदवस्थायामपि बाल्यकालीनः देहः एकविधो वर्तते, स्थाविरे तु अन्यविधः।

तत्र बहु भेदो वर्तते तथापि अहन्तु स एव भवामीति प्रत्यभिज्ञा वर्तते। एवञ्च आत्मा देहाद्व्यतिरिक्त इति ज्ञातुं शक्यते। अतः सुषुप्त्यवस्थया आत्मनः विवेकः भवति।

आत्मा स्वप्रकाशकः इति वेदान्तसिद्धान्तः। तर्हि अहमिति पदार्थो एव आत्मा स्यात् तदानीं अहमिति भावः किमपि अन्यत् प्रमाणम् अनपेक्षयैव भवति इति वक्तव्यम्। तथा सति सुषुप्तौ अहमिति भासेत। छान्दोग्योपनिषदि श्रूयते **"नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति**[११]**"** इति न जानाति। तत् कुतो न जानाति? तदा उच्यते - अहं नास्मि इति कारणात्। यतः अहं यत्र वर्तते तत्र च अहमिति जानीयादेव। अहमर्थः विद्यमानस्सन् अज्ञातो न कदापि भवति। "अहम्" इत्यत्र जाग्रदवस्थायां स्वप्नावस्थायां वा अहमस्मि वा न वा इति विषये नास्ति संशयः। परं सुषुप्त्यवस्थायां स एव पदार्थो नास्ति। तत्र किं कारणमिति चेत् तत्र आत्मा तु विद्यते, यतो हि उत्थितः पुरुषः स्मरति, परन्तु अहमिति तु नोल्लिख्यते। अस्य इदमेव तात्पर्यं भवति यत् आत्मसकाशात् अहमर्थ ईषद् भिन्नः। न तु अत्यन्तं भिन्नः। अहमिति पदार्थः आत्मनः सकाशात् विविच्य कुत्रापि प्रकटयितुं न शक्यते। यथा शुक्तिरूप्यमित्यत्र "इयं शुक्तिः", इदं रजतमि"ति यथा पृथक्-पृथक् प्रदर्शयितुं न शक्यते। तथैव "अयमहं पदार्थः" "अयमात्मा" इति विविच्य प्रदर्शयितुं न शक्यते, परन्तु बुद्ध्या विवेक्तव्योऽयमंशः। एवञ्च बुद्ध्या विविच्यमाने अहमित्यत्र अंशद्वयं सिद्ध्यति। अत एव पञ्चपादिकाकारादयः अहमिति तावत् प्रथमोऽध्यास इति निरूपयन्ति। ततः परं अहमित्यध्यासानन्तरमन्ये अध्यासाः जायन्ते। एवञ्च अयमहं पदार्थः चिदचिद्ग्रन्थिरूपः। अस्य तु भेदनं न प्रकारान्तरेण सुशकम्, किन्तु उपनिषज्जन्यतत्त्वज्ञानेनैव शक्यम् अत उपनिषदेव शरणीकरणीया। एतादृशमात्मस्वरूपं केनापि अन्येन प्रमाणेन न ज्ञायते, अत एव इदमौपनिषदतत्त्वमित्युच्यते **"तं त्वौपनिषदं पुरुषं पृच्छामि**[१२]**"** इति। अन्यथा देहेन्द्रियादिभ्यो व्यतिरिक्तः आत्मा उपनिषदम् अनाश्रित्यापि स्थापयितुं शक्यते। यथैतदन्यैः दार्शनिककारैः क्रियत एव। अतः आत्मतत्त्वस्य प्रकाशनं उपनिषद एव सम्भवति इति कृत्वा औपनिषद इति शब्दः निरूपचरितः। एवञ्च अहं पदार्थात् व्यतिरेकः य आत्मा, अतः आत्मज्ञानार्थमपि सुषुप्त्यवस्थायाः प्रयोजनं विद्यते इति शम्।

## सन्दर्भग्रन्थाः

१. बृहदारण्यकोपनिषत् (शाङ्करभाष्यसहिता),
स्वामिमाधवानन्दः, अद्वैत-आश्रमः, अल्मोडा, १९५०

---

[११] छान्दोग्योपनिषत्, ८-११-१

[१२] बृहदारण्यकोपनिषत्, ३-९-२६

२. छान्दोग्योपनिषत् (आनन्दगिरिकृतटीकासंवलितशाङ्करभाष्यसहिता), आनन्दाश्रममुद्रणालयः, पूना, १९४४

३. वेदान्तपरिभाषा (शिखाममिमणिप्रभाटीकाविभूषिता), राष्ट्रियसंस्कृतसंस्थानम्, नवदेह्ली, २०११

४. ब्रह्मसूत्रशाङ्करभाष्यम्, व्याख्याकारः स्वामिसत्यानन्दसरस्वती, चौखम्बा-संस्कृतप्रतिष्ठानम्, देह्ली, २००७

५. वेदान्तसारः, व्याख्याकारः आचार्यबदरीनाथशुक्लः, मोतीलालबनारसीदास, वाराणसी, १९७९